# .. shrI subrahmaNyastotramaalaamantraH ..

## ॥ श्री सुब्रह्मण्यस्तोत्रमालामन्त्रः ॥

ॐ ह्रीं सां रुद्रकुमाराय अष्टाङ्गयोगनायकाय
महामणिभिरलंकृताय क्रौञ्चगिरिविदारणाय
तारकसंहारकारणाय
शक्तिशूलगदाखड्गखेटपाशाङ्कुशमुसलप्रासाद्यनेक
चित्रायुधालंकृताय द्वादशभुजाय हारनूपुरकेयूरकनक
कुण्डलभूषिताय सकलदेवसेनासमूह परिवृताय गांगेयाय
शरवणभवाय देवलोकशरण्याय सर्वरोगान् हन हन दुष्टान्
त्रासय त्रासय, गणपतिसहोदराय
भूतप्रेतपिशाचकर्षणाय, गंगासहायाय
ॐकारस्वरूपाय विष्णुशक्तिस्वरूपाय रुद्रबीजस्वरूपिणे
विश्वरूपाय महाशान्तायते नमः । टीं मोहिन्यै नमः । ह्रीं
आकर्षण्यै नमः । ह्रीं स्तंभिन्यै नमः ।
शत्रूनाकर्षयाकर्षय बन्धय बन्धय
सन्ताडय सन्ताडय वातपित्तश्लेष्मज्वरामयादी नाशु
निवारय निवारय सकलविषं भीषय भीषय सर्वोपद्रव
मुत्सारयोत्सारय मां रक्ष रक्ष भगवन् कार्तिकेय प्रसीद
प्रसीद ।

ॐ नमो भगवते सुब्रह्मण्याय महाबलपराक्रमाय
क्रौञ्चगिरिमर्दनाय अनेकासुरप्राणापहाराय
इन्द्राणीमांगल्यरक्षकाय त्रयस्त्रिंशत्कोटिदेवतानन्दकराय
दुष्टनिग्रहाय शिष्टपरिपालकाय वीरमहाबल
हनुमन्नारसिंह वराहादिसहिताय
इन्द्राग्नियमनैर्युतवरुणवायुकुबेरेशानदिगाकाशपाताळबन्धनाय
सर्वचण्डग्रहादि नवकोटिगुरुनाथाय नवकोटिदानवशाकिनी
डाकिनी कामिनी मोहिनी स्तंभिनी गण्डभैरवी
दुष्टभैरवादिसहितभूतप्रेतपिशाचभेताळब्रह्मराक्षसदुष्टग्रहान्
बन्धय बन्धय शण्मुखाय वज्रधराय सर्वग्रहनिग्रहाय
सर्वग्रहं नाशय नाशय सर्वज्वरं नाशय नाशय
सर्वरोगं नाशय नाशय सर्वदुरितं नाशय नाशय ॐ ह्रीं
सां शरवणभवाय ह्रीं फट् स्वाहा ॥

॥ इति श्री सुब्रह्मण्यस्तोत्रमालामन्त्र समाप्तः ॥

---

Encoded and proofread by antaratma at Safe-mail.net

---

Please send corrections to sanskrit@cheerful.com
Last updated March 16, 2006